The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

# श्रीमद्भगवद्गीतायाः आत्मप्रसङ्गः : एक अध्ययनम्

**डां. आलिशा विश्वाल**
धरणीधर-विश्वविद्यालयः, केन्दुझरम्, ओडिशा

**सारांश**

उपनिषद् सु ये भावाः केवलं दार्शनिक पध्दत्या नीरस शैल्या च प्रतिपादिताः सन्ति, ते भावाः एव भावप्रकाशनशैल्या श्रीमद्भगवद्गीतायां विशद रूपेण प्रस्तूयन्ते । श्रीमद्भगवद्गीतेयं न केवलं सर्वासामपि वेद उपनिषदां सारभूता अपितु सकल शास्त्राणां सारमपि कथ्यते । अत्र भगवान् श्रीकृष्ण ब्रह्मस्वरूपं, जीवात्मा, परमात्मा, अध्यात्मतत्वादि उपरि शंका दूरीकर्तुं अर्जुनं प्रति वदति। अत्र आत्मस्वरूपं निरूपणम् प्रसंगेऽस्मिन् भगवान् श्रीकृष्णः अर्जुन निमित्तं वदति ।

**कूट शब्दाः**

जीवात्मा, परमात्मा, अध्यात्मतत्व,शाश्वत,पुराण, आत्मप्रसंगः ।

**उपक्रमः**

**"ऊर्द्धमूलमधःशाखमश्वथ्थं प्राहुरव्ययम्।**

**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥"[१]**

बहुकालाद् आरभ्य अस्माकं दार्शनिकसम्प्रदाये श्रीमद्भगवद्गीता प्रमाणरूपेण विराजते । अखिलभूमण्डले अस्मिन् समुपलब्धेषु विविधभाषागतेषु प्राचीनग्रन्थेषु श्रीमद्भगवद्गीता एक सारभूता प्राचीनतमः ग्रन्थः इति सर्वैरेव अङ्गीक्रियते । गीतायां भावप्रकाशनशैल्या गीतायां विशदं प्रस्तुयते । परन्तु उपनिषदे भाषा केवलं दार्शनिकपद्धत्या नीरसशैल्या च प्रतिपादिता । गीतेयं न केवलं सर्वासामपि उपनिषदां सारभूता अपि तु श्रुतिसारमपि कथ्यते ।

पराशरमुनेः पुत्रस्य व्यासदेवस्य कृतिः तथा अस्माकं भारतीयसंस्कृतेः एकः प्राचीनतमः तथा मौलिकग्रन्थः इति प्रसिद्धः महाभारतः। मुख्यतः महाभारतः तत्कालीनसमाजस्य दर्पण इति वक्तुं शक्यते ।

महाभारतः अष्टादशपर्वणि विशिष्टः ग्रन्थः अस्ति। अष्टादशपर्वाणां मध्ये श्रीमद्भगवद्गीता भीष्मपर्वणि विराजते । महाभारतः प्रधानतः पाण्डवकौरवाणां राजनैतिकसंग्रामस्य साक्षीरूपेण गृहीतम् । महाभारते यत् पंच स्वर्णालंकारा इति उपाधि भूषिताः सन्ति तन्मध्ये भगवद्गीता सर्वलोक आदृता । अतः कथ्यते-

**"गीतामाश्रित्य बहवो भूभुजो जनकादयः ।**

**निर्धूतकल्मषो लोके गीता याताः परं पदम् ॥"[२]**

**भगवद्गीतायाः आत्मविचारः**

यदि व्यक्तिः परब्रह्मणः उपासनां करोति तदा सः तत् ज्ञातुं तत् प्राप्तुं शक्नोति। गीतायामुक्तम्-

**"किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।**

**अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥"[३]**

**"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।**

**भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥"[४]**

**"अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।**

**अधियज्ञोऽऽमेवात्र देहे देहभृतां वर ॥"[५]**

अनेन कथानुसारेण ब्रह्मस्वरूपं-जीवात्मा-श्चाध्यात्मं,तथा सूर्यस्य अन्तर्गतः विद्यमानः हिरण्यगर्भाधिदैवतरूपेण सिद्धः।(गीता भाष्य ८-४) अर्थात् यः ब्रह्म प्राप्नोति सः स्वयमेव ब्रह्मो एव भवति। एवं तस्य ब्रह्मज्ञानद्वारेण हर्षशोकयो अनुभूति न भवति। सः एतौ समानं मनुते। अत गीतायां-

**"यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।**

**समदुःख सुख धीरं सोऽमृतत्वाय कल्पते ॥"**

आत्मा न तु जातये न हि अस्य नाशः भवति । यस्य उत्पत्तिः भवति तस्य अनित्यवस्तुनः बहूनि विकाराणि भवन्ति । परन्तु आत्मा न जायते म्रियते वा इत्युक्त्वा विकाराणां निषेधमात्रं कथितम्। पुनश्च अर्थान्तररूपेण स्वयं उत्पन्नः भवति । अतः आत्मा अजन्मा,नित्य,शाश्वत,चिरन्तन अस्ति। अयं शस्त्रैः शरीरनाशे अपि न हन्यते,अर्थात् शरीरे स्थित्वा अपि आत्मा अयमाकाशवत् निर्लिप्तः भवति । अस्मिन् प्रसङ्गे भगवान् श्रीकृष्णः अर्जुननिमित्तं वदति ।

**"न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥"[६]**

अत्रापि आत्मनः स्वरूपस्य वर्णना अस्ति । **"न जायते न म्रियते वा"** । इदं वाक्यं आत्मनः उत्पत्तिविनाशयोः अभावं कथयति । षट् विकाराणि सन्ति यथा- उत्पत्ति, अस्तित्वं, वृद्धिः, विपरिणामः, अपक्षयः विनाशश्च । भगवद्गीतायां आत्मनि प्रयुज्यमानशब्दैः तस्य स्वरूपस्य दृढता कथिता । यथा-

**न जायते म्रियते कदाचित्-** अस्य अर्थ अस्तु न जायते न म्रियते शरीरमिदं न पुनर्जन्मः। इदं शाश्वतं सनातनं च। अतः भगवान् श्रीकृष्णः वदति-

**"ममैवांशो जीवलोके जीवभूतः सनातनः"**

**अयं भूत्वा भविता वा न भूयः-** अर्थात् अयं आत्मा जीवात्मारूपेण स्थित्वा सत्तायुक्तः न भवति । "परन्तु स्वभावतः सदा अस्य अस्तित्वं अस्ति। स्वतः निर्विकार अयं । नित्यतत्वस्य संज्ञा स्वतःसिद्धः निर्विकारः च । अयं अविकारी संज्ञायां आदि अन्तश्च नास्ति ।

**अजः-** अस्यार्थस्तु यस्य जन्मः न भवति। इदं शरीरी कदा अपि जन्म न भवति। अतः अस्य उत्पत्तिरूपं विकारस्य अभावं वर्तते। अयं आत्मा जन्मरहितं।

**नित्यः-** नित्यः इत्युक्ते आत्मा चिरस्थायी इति ज्ञायते । न अवक्षयते । शरीर इन्द्रिय, अन्तकरण, इत्यादीनां अवक्षयं स्यात् । परन्तु आत्मा अमरः, शाश्वतः, चिरन्तनः सत्यं च ।

**शाश्वतः-** अयं आत्मा एकरूपं, निरन्तरं स्यात्। कदा अपि न परिवर्तनं स्यात्।

**पुराणः-** अयं आत्मा अविनाशी तत्त्वं पुराणं अर्थात् अनादि अस्य न आदिः न अन्तः । नित्य इत्यर्थः एषः सिद्धान्तः एतावत् पुरातनः **"कदापि न निर्मितम्"** वस्तु अप्रचलितत्वे व्युत्पत्त्या भवन्ति । न पुनः वध्नान्ति परन्तु नाश प्रारभ्यते । परन्तु एषः व्युत्पन्नः, अध्ययनः अस्ति अतः वर्धमानः विकारः । तत् कथं सम्भवति। अस्मिन् दिनचर्चायां विघटनं न भवति ।

**न हन्यते हन्यमाने शरीरे-** शरीरं विनस्यते परन्तु अविनाशी तु शरीरि वा आत्मा। शरीरं नष्टशीलं ,अस्माकं शरीरे षड्

विकाराणि परिलक्ष्यते । यथा- अस्ति, जायते, वर्द्धते, विपरिणमते, अपक्षियते, विनश्यति । परन्तु अयं षड् विकाराणि न परिलक्ष्यन्ते आत्मेव ।

अयं आत्मा अविनाशी,नित्यं,जन्मरहितं अव्ययं च इति ज्ञायते यः मानवः, कथम् सः कम् इति कम् घातयति ? इति उक्त्वा भगवान् श्रीकृष्णः अर्जुननिमित्तं वदति-

**"वेदविनाशिनं नित्यं य एनमजमव्ययम् ।**

**कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥"[७]**

अत्र भगवान् श्रीकृष्णः वदति अयं आत्मा कदा न नश्यते,कदा अपि न परिवर्तन्ते, कदा न जायन्ते, शरीरे तं शरीरं तथा शरीरेषु अनवस्थितेषु अवस्थितं अर्थात् आत्मा अनित्येषु नित्यस्वरूपं अस्ति, आत्मनः आकृति संबन्धे श्वेताश्वेतर-उपनिषदे वर्णितं –

**"वालाग्रशतभागस्य शतधा कल्पितस्य च ।**

**भावो जीवः स विज्ञेयः स च अनन्ताय कल्पते ॥"[८]**

**"केशाग्राशतभागस्य शतांशः सदृशात्मकः ।**

**जीवः सूक्ष्मस्वरूपोऽयं संख्यातीतो हि विल्कणः ॥"[९]**

अर्थात् अयं आत्मा नाशः भवितुं न शक्नोति संपूर्णशरीरे परिव्याप्तः । पुनः च कः अपि अमुं नाशयितुं समर्थः अपि न भवति। यथा नरः जीर्णानि वासांसि परित्यज्य नवानि वस्त्राणि गृह्णाति, तथा अयं आत्मा जीर्णानि शरीराणि विहाय नवानि शरीराणि धारयति । उक्तं च भगवान् श्रीकृष्णः -

**"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।**

**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥[१०]**

**"नैनं छिन्दति शस्त्राणि नैनं दहति पावकः।**

**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥"[११]**

**"अछेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।**

**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥"[१२]**

**"अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।**

**तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥"[१३]**

**"अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।**

**तथापि त्वं महावाहो नैवं शोचितुमर्हसि॥"[१४]**

श्रीमद्भगवद्गीतायाः द्वितीयाध्याये सांख्ययोगस्य महत्त्वं गृहीतमस्ति । भगवान् श्रीकृष्णः अर्जुनं प्रति वदति- एनम् आत्मा शस्त्राणि न छिन्दति । पावकः एनम् न दहति । अपि च न आपः एनं क्लेदयन्ति न हि मारुतः शुष्क करोति ।

पुनः वदति अयं आत्मा अछेद्यः, अदाह्यः, अक्लेद्यः, अशोष्यः भवति । कारणं तु आत्मा नित्यः, सर्वगतः, स्थाणुः, अनन्तः एवं सनातनः । अयं आत्मा अखण्डः, अव्यक्तः, तथा निर्विकार अस्ति । ततः तस्य नाशः न भवति । आत्मनि

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

अविनाशित्वं, नित्यः, सर्वगतः एवं सनातनः इति ।

अयं अव्यक्तः,अनित्यः,अविकार्यः उच्यते। तस्मात् एवं विदित्वा अनुशोचितुं न अर्हसि। नित्य तथा सनातनः आकाशः नित्यः इति न कथितुं शक्नुमः कारणं तु महाप्रलये तस्य नाशं भवितुं अर्हसि। परन्तु आत्मनं कदापि नाशः न भवति। आत्मनः नित्यता सनातनत्वं अत्र प्रमाणितमस्ति-

**"देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।**

**तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥"**[१५]

पुनः उक्तम्-

**"भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।**

**रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥"**[१६]

**"परस्तस्मात् तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः ।**

**यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥"**[१७]

अत्र भगवान् श्रीकृष्णः कथयति आत्मनं सनातनः व्यक्ताव्यक्तं । यदा सर्वं जगत् ध्वसं भवति आत्मा पूर्ववत् तिष्ठति एव ।

**अव्यक्तः -** अव्यक्तात् पदं ब्रह्मणः सूक्षशरीरस्य वाचकम्। आत्मा इन्द्रियद्वारेण ज्ञातुं न शक्यते । अस्य सूक्ष्मता हेतोः कोऽपि द्रष्टुं न शक्नोति। अत्र अव्यक्तः इति पदस्य आत्मनः उपरि सार्थकता प्रतिपादयति ।

**सर्वगतः -** ईश्वरस्य सृष्टेः जीवात्मा सर्वत्र पुर्णमात्रायाम् भवति यथा जले स्थले आकाशेऽपि । आकाशः सर्वगतः अपि एवं कथितुं न शक्नोति ।

**अचिन्त्यः -** अयं आत्मा मनसः विषयः अपि नास्ति । केवलमात्रे श्रुतिप्रमाणं हि गृहीतम् । तस्य अस्तित्वं न तु वैज्ञानिकगवेषणामाध्यमेन प्रतिपादयितुं शक्नुमः । परन्तु अनेन मार्गेणाऽपि व्यक्तिः पूर्णतया समर्थः न भवति ।

**स्थाणुश्चलः -** अत्र आत्मनि अचलः । चलन-कम्पनक्रियायाः अभावः कथितः आत्मा न तु चलति, न हि कम्पमानो भवति। अत्र कम्पनक्रियया अभावं अनुभूयते । अयं स्थिरं अचलं इति प्रतिपाद्यते ।

**अविकार्यः -** अयं आत्मनि विकार्यभावं न दृश्यते । यथा शरीरे परिवर्तनं भवति तादृशं परिवर्तनं आत्मनि न भवति । पुनश्च आत्मा महतः महत्तरं इति यथोक्तम् अत्र आत्मा न तु हन्ति न हि हन्यते । यदि हन्तां तं हन्तुं इच्छन्ति तथा तं हतं इति मन्यते, तर्हि स तं न जानाति यतः ताभ्यां भिन्नं अस्ति । तदा आत्मा अविनाशी । भगवान् श्रीकृष्ण उक्तं यथा-

**"य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।**

**उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥"**[१८]

आत्मनः प्राप्ते प्रसङ्गः वर्णित अस्ति। अयं न हि प्रवचनेन, न मेधया, न बहुना श्रुतेन, न दानेन, न हि यज्ञेन, न तु कठिनतपस्यामाध्यमेन लभ्यो । अतएव आत्मतत्त्वं सहजबोध्यं नास्ति अपि तु अत्यन्तं गुढ अस्ति । यत् सज्ञानेन अपि ज्ञातुं न शक्यते ।

**उपसंहारः**

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

भगवान् श्रीकृष्णः भगवद्गीतायां आत्माप्रसङ्ग उपरि यः सार्थकता प्रतिपादयति ते अतीवं तात्पर्यपूर्णाः महत्त्वपूर्णाः च। वेदे उपनिषदे ये भाषाः दार्शनिकशैल्याः प्रतिपादिताः सन्ति, ते एव भाषा भावप्रकाशनशैल्या गीतायां विशदं प्रस्तुयते। पार्थो वत्सः सुधीः भोक्ता दुग्धं गीतामृतं महत्।

**सन्दर्भः**

1. श्रीमद्भगवद्गीता(१५-१)
2. गीतामाहात्म्यम्।
3. श्रीमद्भगवद्गीता (८-१)
4. श्रीमद्भगवद्गीता (८-३)
5. श्रीमद्भगवद्गीता (८-४)
6. श्रीमद्भगवद्गीता (२-२०)
7. श्रीमद्भगवद्गीता (२-२१)
8. श्वेताश्वेतर (५-९)
9. श्रीमद् भागवतम्
10. श्रीमद्भगवद्गीता (२-२२)
11. श्रीमद्भगवद्गीता (२-२३)
12. श्रीमद्भगवद्गीता (२-२४)
13. श्रीमद्भगवद्गीता (२-२५)
14. श्रीमद्भगवद्गीता (२-२६)
15. श्रीमद्भगवद्गीता (२-३०)
16. श्रीमद्भगवद्गीता (८-१९)
17. श्रीमद्भगवद्गीता (८-२०)
18. श्रीमद्भगवद्गीता (२-१९)

**परामृष्टग्रन्थाः**

1. स्वामी-रामसुख दासः, श्रीमद्भगवद्गीता,साधक सञ्जीवनी टीका,गीता प्रेस,गोरखपुर।
2. श्रीमद् गौरगोविन्द स्वामी,श्रीमद्भगवद्गीता,मौलिक रूप,भक्ति वेदान्त वुक् ट्रष्ट,मुम्बाई।
3. श्री श्री परमहंस योगानन्द,ईश्वर अर्जुन संवाद, श्रीमद्भगवद्गीता,योगानन्द सत्सङ्ग सोसाईटि,इण्डिया।
4. तिलक-लोकमान्य,गीता रहस्य,किताव महल,अल्हावाद,१९१९।

5. तिलक-लोकमान्य,वालाना गधर, गीता रहस्य,मोतिलाल वनारसीदास, १९७५।
6. श्रीमद्भगवद्गीता स्वरहस्य, गीता प्रेस,गोरखपुर, १९५५।
7. श्रीमद्भगवद्गीता, लोहारी,रन्धिर प्रकाशन,हरिद्वार, १९९८।
8. महर्षि वेदव्यास,महाभारत,हिन्दी ट्रान्सलेशन,स्वामी अश्वनन्दन,सरस्वती,गीताप्रेस, गोरखपुर, १९७०।
9. चाटार्जी एण्ड् दास्,इण्डियान् फिलोसोफि,परिमल,पब्लिकेशन,दिल्ली, १९९५।
10. विश्वनाथ,तत्त्व टीका,निरिणय सागर प्रेस्,वम्वे, १९७६।
11. परमहंस योगानन्द,गड् टकस् विथ् अर्जुन्,योगानन्द सोसाईटि अफ् इण्डिया,कोतकाता,२००२।
12. दि टिचिङ् अफ् भगवद् गीता,भिजन् वुकस्,इण्डिया, १९८८।
13. इलिभेशन् अफ् कृष्ण कन्सिअस्नेस्,इण्टरनाशनाल भक्तिवेदान्त वुक् ट्रष्ट।
14. एस् राधाकृष्णन्,दि भगवद्गीता,लण्डन्,२००२।तिलक् वि.जि, श्रीमद्भगवद्गीता रहस्य,कर्म योग शास्त्र,तिलक ब्रादार्स,पुने, १९९९।
15. यारडि,एम् आर्, भगवद्गीता,भारतीय विद्या भवन्।
16. वेशान्त ए, दास वि, दि भगवद्गीता,तेनाई पब्लिकेशन हाउस्, १९२६।
17. स्वामी अखिलानन्द,हिन्दु साइकोलोजि आण्ड मिनिङ्ग फर् दि वेष्ट,केगान् पाल् लिमिटेड्,लण्डन्, १९४८।